श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवण्शठकोप श्रीश्रीनिवासनिगमान्तयतीन्द्र महादेशिकैरनुगृहीतम्

# ॥ श्री लक्ष्मीनृसिंहादिसुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीनृसिंहादिसुप्रभातम् ॥

कौसल्यासुप्रजा ! राम ! पुर्वा संध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल ! कर्तव्यं दैवमाह्निकम्॥ १ ॥

श्रीमान् रामानुजार्यो यतिपतिरखिलान् त्रातुकामः स्वशिष्यान्
भाष्यं शारीरकार्थप्रकटनमकरोत् बाह्यसिद्धान्तभेत्ता।
यस्तस्मिन् क्षुभ्यमाणे कथककुलवचोवज्रपातैस्स भूयः
साक्षादुत्प्रेक्ष्यमाणोऽभवदिति जयतात् श्रीनिवासो यतीन्द्रः॥ २ ॥

तव सुप्रभातमरुणाब्जलोचने
तरुणेन्दुबिम्बवदनेऽघमोचने।
शरणागतार्तिहरणाय दीक्षिते
करुणारसौघवरुणालयेक्षिते॥ ३ ॥

तव सुप्रभातममरेन्द्रसुन्दरि !
करपल्लवान्तकलितोरुमालिनि।
क्षणरुक्सहस्रतुलिताङ्गसौभगे
कनकाञ्चितोरुमणिकुण्डलाञ्छिते॥ ४ ॥

तव सुप्रभातमसुरारिवल्लभे !
निजवल्लभाङ्क सरसीसरोरुहे।
करपल्लवात्तजलजातकुड्मले
रविकोटिभासि कुरुविन्दमौळिके॥ ५ ॥

तव सुप्रभातमखिलार्तिभञ्जनि !
प्रणतार्तभक्तजनचित्तरञ्जनि।
वरतापनीयविदितात्मवैभव-
प्रियवक्त्रचन्द्रसुचकोरलोचने॥ ६ ॥

देवाश्चतुर्मुखपुरन्दरशङ्कराद्याः
सिद्धाः सनातनसनन्दननारदाद्याः।
त्वामर्चितुं विविधपुष्पकराश्चरन्ति
लक्ष्मीनृकेसरिविभो ! तव सुप्रभातम्॥ ७ ॥

देवो दिवाकर इह प्रथितप्रकाशो
दिव्यैः करैस्त्वदनघाङ्घ्रियुगं सहस्रैः।
संवाहितुं भृशमुदेति हरेर्दिशायां
लक्ष्मीनृकेसरिविभो ! तव सुप्रभातम्॥ ८ ॥

वेदाश्च सामयजुरादय आविभान्ति
शब्दैरलक्षितगुणैः स्वगुणं स्तुवन्तः।
त्वल्लिङ्गनामगुणकीर्तनलब्धभावाः
लक्ष्मीनृकेसरिविभो ! तव सुप्रभातम्॥ ९ ॥

विप्राः स्वनुष्ठितगरिष्ठगुणक्रियाद्याः
स्नाता विशुद्धमनसो विमलैर्वचोभिः।
त्वां स्तोतुमद्य विविधैः प्रणताश्चरन्ति
लक्ष्मीनृकेसरिविभो ! तव सुप्रभातम्॥ १० ॥

उच्चैश्श्रवस्तुलित एष विभाति तेऽश्वः
स्तम्बेरमा मदजलाप्लुतगण्डदेशाः।
भृत्याश्च ते करयुगोद्धृतचामराद्याः
लक्ष्मीनृकेसरिविभो ! तव सुप्रभातम्॥ ११ ॥

धेनुः पुरन्दरपुरान्तरभूषणं सा
त्वत्किङ्करत्वकरणाय धरामवाप्य।
त्वद्दृष्टिभावितसुधामसुधासुधारां
आकाङ्क्षते नरहरे ! तव सुप्रभातम्॥ १२ ॥

भृत्योऽहमद्य यतिरूपमुपेयिवांस्ते
पादाम्बुजद्वयपरीचरणाय यत्तः।

जागर्मि विश्वगुणनिर्मितनर्मशील
लक्ष्मीनृकेसरिविभो ! तव सुप्रभातम्॥ १३ ॥

वाराशिराजतनयानयनाम्बुजात-
माध्वीरसज्ञनयनाख्यमिलिन्दयुग्मम्।
सञ्चारयाद्य विनतेषु तदीयभक्ति-
सारग्रहाय नृहरे ! तव सुप्रभातम्॥ १४ ॥

सह्यापगोत्तरतरङ्गविभङ्गसङ्ग-
तुङ्गाङ्गशीतिममरुज्जडिमोत्तरङ्गे।
रङ्गे विहाय रुचिमत्र विराजसे त्वं
श्रीरङ्गनायकविभो ! तव सुप्रभातम्॥ १५ ॥

नारायणाद्रिविसरद्विपुलस्रवन्ती
निष्क्रान्तनिर्झरझलञ्झलगाढशब्दैः।
अस्पृष्टमानस इवात्र विहारकाङ्क्षी
त्वं भासि वेङ्कटपते ! तव सुप्रभातम्॥ १६ ॥

गोपीगृहान्तरुपकल्पितमन्थनात्त-
हैयङ्गवीनहृतिकल्पितनृत्तजातम्।
अद्यापि तथ्यमिह कर्तुमिवासि तादृग्-
रूपो यदूत्तमविभो ! तव सुप्रभातम्॥ १७ ॥

इत्थं रमानृहरिरङ्गधुरीणशेष-
शैलेश यादवकुलाधिपसुप्रभातम्।
भक्त्या परं व्यतनुताखिलसाधुभाव्यं
श्री श्रीनिवासनिगमान्तयतिर्विशुद्धः॥ १८ ॥

॥ इति श्री लक्ष्मीनृसिंहादिसुप्रभातं समाप्तम् ॥